## निर्देशा: :

## Instructions :

**(i)** अस्मिन् प्रश्नपत्रे चत्वारः खण्डा: सन्ति ।
इस प्रश्न-पत्र में चार खण्ड हैं।
The question paper has four sections.
**(ii)** प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।
The answers to each section must be written at one place.
**(iii)** प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।
प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।
Write the question number according to the question paper.
**(iv)** सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
सभी प्रश्नों के उत्तर संस्कृत में लिखिए ।
Answer all the questions in Sanskrit.

## खण्ड:-क (SECTION A)

## अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

## Unseen Reading Comprehension

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**
**निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए**
**Read the following prose passage and write the answer of the given questions in Sanskrit.**

शिक्षा मानव-विकासस्य परमं साधनम्। शिक्षा ज्ञानोदयेन नैतिकं चारित्रिकं च विकासं संपादयति । शिक्षा सांस्कृतिकीं द्रष्टिं उद्बोधयति । वर्तमान-शिक्षा-पद्धतौ बालकस्य सर्वाङ्गीण-विकासस्य परिकल्पना अस्ति । अधुना बाला: आधुनिक विषयान् अपि अध्येतुं संप्रेरिता: दृश्यन्ते । यथा हि विज्ञानम्, गणितम्, भूगोलम्, इतिहासम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, संगीतम्, संगणकयन्त्रम् (computer) आदय: । वर्तमान-शिक्षा-पद्धतौ शिक्षिता: युवका: युवत्यश्च कठिनं श्रमं कृत्वा स्व-स्व क्षेत्रे महत्त्वपूर्णम् साफल्यं प्राप्तवन्तः । अतएव शिक्षा श्रमस्य महत्त्वमपि शिक्षयति । शिक्षिता: युवका: मानवीयगुणान् प्रति आकर्षिता: भवन्ति । अस्माकं देशे शिक्षा प्राप्त्यै कोऽपि बाल: कापि बाला व अर्थाभावं न अनुभवेत् इति शासनं प्रयतेत । यत: शिक्षा न केवलं मानवकल्याणाय अपेक्षिता अपितु सा राष्ट्रगौरवाय अपि महत्त्वपूर्णा।

**प्रश्ना:**

**(अ)** एकपदेन उत्तरत । (केवलं प्रश्नचतुष्टयम्)
एक शब्द में उत्तर दीजिए । (केवल चार प्रश्न)
Answer in one word. (Only four questions)
**(i)** शिक्षा कस्य महत्त्वं शिक्षयति ?
**(ii)** मानव-विकासस्य परमं साधनं किम् ?
**(iii)** शिक्षा कीदृशीं दृष्टिम् उद्बोधयति ?
**(iv)** शिक्षिता: युवका: कान् गुणान् प्रति आकर्षिता: भवन्ति ?
**(v)** बालकस्य सर्वाङ्गीणविकासस्य कुत्र परिकल्पना अस्ति ?

**(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)**
**पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)**
**Answer in a complete sentence. (Only two questions)**
**(i)** शिक्षा कीदृशं विकासं संपादयति ?
**(ii)** शासनं किं प्रयतेत ?
**(iii)** वर्तमान-शिक्षा-पद्धतौ बालक: कान् विषयान् अपि शिक्षेत ?

**(स)** यथानिर्देशम् उत्तरत । (केवलं प्रश्नचतुष्टयम्)
निर्देशानुसार उत्तर दीजिए । (केवल चार प्रश्न)
Answer according to instructions. (Only four questions)
**(क) 'अस्ति' इति क्रियापदस्य कर्तृपदं किम् ?**
(i) शिक्षा

(ii) परिकल्पना
(iii) बालक:
**(ख) 'शिक्षिता:' इति विशेषणपदस्य विशेष्यपदं किम् प्रयुक्तम् ?**
(i) बालका:
(ii) युवका:
(iii) प्रेरका:
**(ग) 'सा राष्ट्रगौरवाय अपि महत्त्वपूर्णा' इति वाक्ये 'सा' इति सर्वनामपदं कस्यै प्रयुक्तम् ?**
(i) बालायै
(ii) शिक्षायै
(iii) युवत्यै
**(घ) 'उद्यम:' इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम् ?**
(i) विकासम्
(ii) श्रम:
(iii) चारित्रिकम्
**(ङ) 'सरलम्' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?**
(i) दृष्टिम्
(ii) विकासम्
(iii) कठिनम्
**(द)** अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write the appropriate title for this passage in Sanskrit.

## खण्ड:-ख (SECTION B)

## रचनात्मककार्यम् (रचनात्मक-कार्य)

## Writing Skills

2. **मित्रं प्रति अधोलिखितं पत्रं** मञ्जूषा**प्रदत्तशब्दै: पूरयित्वा पुन: लिखत ।**
**मित्र को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुन: लिखिए।**
**Complete the following letter, written to your friend, with the help of the words given in the box and rewrite the same.**

कावेरीछात्रावासात्
दिनाङ्क: ___

प्रिय मित्र माधव,
(i) ___ ।
अत्र कुशलं तत्रास्तु । अहं (ii) ___ सज्जायां व्यस्त: आसम् । अत: विलम्बेन तव पत्रस्य उत्तरं ददामि । अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भाग: (iii) ___ । अस्माकं विद्यालयस्य छात्रा: राजपथे (iv) ___ प्रदर्शनम् अकुर्वन् । अहं गरबानृत्यस्य (v) ___ आसम् । छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनि: (vi) ___ गुञ्जितम् अकरोत् । स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि, विचित्रवर्णानि परिदृश्यानि, (vii) ___ च दृष्ट्वा अहं गौरवान्वित: अस्मि । (viii) ___ बाल्यावस्थाया: स्वप्न: तत्र पूर्ण: जात: । (ix) ___ वन्दनीयौ ।

भवत:
(x) ___ महेश:।

| मञ्जूषा |
|---|
| गृहीत:, पितरौ, नमस्ते, मम, मित्रम्, राजपथम्, लोकनृत्यस्य,लोकनृत्यानि,गणतन्त्रदिवससमारोहस्य, प्रमुखसञ्चालक: । |

3. **अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन पञ्च वाक्यानि संस्कृतेन लिखत ।**

**नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से पाँच संस्कृत वाक्यों में कीजिए ।**
**Describe the following picture in five Sanskrit sentences with the help of the words given in the box below.**



| **मञ्जूषा** |
| --- |
| वृक्षाः, क्रीडावनम्, अधः, बालकाः, दोला, सन्ति, माता, पुत्रः, उपरि, जनाः, क्रीडन्ति, बालिकाः, छत्रम्, आरूढाः, नीचैः, आयान्ति । |

**अथवा (OR)**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।**
**मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर पाँच संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।**
**Write a paragraph in five Sanskrit sentences on the following topic with the help of the words given in the box .**

| **स्वच्छतायाः महत्त्वम्"** |
| --- |
| **मञ्जूषा** |
| स्वच्छम्, स्वच्छतायाः, शरीरम्, उद्देश्यम्, उपयोगिता, स्थानम्, स्वास्थ्यरक्षायै, वस्त्रादिकम्, जलम्, खाद्यवस्तूनि, मनसि प्रसन्नता, समाजे सम्मानम्, सर्वदा, कर्तव्यम्। |

## खण्डः-ग (SECTION C)

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

## Applied Grammar

4. **अधोलिखितवाक्येषु "रेखाङ्कितपदेषु" सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलं प्रश्नचतुष्टयम्)**
**निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धि-विच्छेद करके लिखिए । (केवल चार प्रश्न)**
**Write the underlined words of the following sentences after joining or disjoining Sandhi's. (Only four questions)**

**(i)** इदं विशालं <u>भो + अनम्</u> अस्ति ।
**(ii)** <u>जगत् + नाथः</u> सर्वान् रक्षति ।
**(iii)** <u>हरिम् + वन्दे ।</u>

**(iv)** प्रत्येकम् अयनस्य अवधि: षण्मासा: ।
**(v)** एकदा पाण्डवाग्रज: युधिष्ठिर: वने जगाम ।

**5.** **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)**
**निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए । (केवल चार प्रश्न)**
**Choose and write the correct compounded or expounded forms of the underlined words in the following sentences. (Only four questions)**

**(क) पाणी च पादौ च प्रक्षाल्य भोजनं कुरु ।**
(i) पाणिपादौ
(ii) पाणिपादम्
(iii) पाणीपादम् ।

**(ख) उपगङ्गम् अयं घोष: शोभते ।**
(i) गङ्गाया: दूरम्
(ii) गङ्ग्याम् एव
(iii) गङ्ग्या: समीपम्

**(ग) सारथि: अवदत् अयम् पीतम् अम्बरम् यस्य स: तिष्ठति ।**
(i) पीताम्बर:
(ii) पीताम्बरम्
(iii) पीताम्बरा ।

**(घ) वयं निर्विघ्नं जीवाम: ।**
(i) विघ्नेन अभाव:
(ii) विघ्नानाम् अभाव:
(iii) विघ्नात् अभाव: ।

**(ङ) अनृतं न ब्रूयात् ।**
(i) ऋतं विना
(ii) ऋतेन सह
(iii) न ऋतम् ।

**6.** **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तर विकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)**
**निम्नलिखित वाक्यों में रेखांकित पदों में प्रकृति-प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए । (केवल चार प्रश्न)**
**Write the underlined words of the following sentences after joining or disjoining suffixes to roots or words, selecting the correct answer from the options given below. (Only four questions)**

**(क) शीताधिक्येन कम्प् + शानच् नर्तकी सभागारं गच्छति ।**
(i) कम्पमान:
(ii) कम्पमाना
(iii) कम्पायमाना ।

**(ख) जनानाम् लौकिक: व्यवहार: अपि अद्भुत: भवति ।**
(i) लौक + ठक्
(ii) लोक + ठक्
(iii) लोक + मतुप् ।

**(ग) बालिकाभि: राष्ट्रगीतं गै + तव्यत् ।**
(i) गीतव्यम्
(ii) गातव्यम्
(iii) गातव्य: ।

**(घ) स्वर्णस्य महत् + त्व सर्वे स्वीकुर्वन्ति ।**
(i) महताम्
(ii) महत्त्वम्
(iii) महत्व ।
**(ङ) दीपिका क्रिकेट-क्रीडायाम् कुशल + टाप् अस्ति ।**
(i) कुशला
(ii) कुशली
(iii) कुशलिनी ।

7. **मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत ।**
**मञ्जूषा में दिए गए शब्दों की सहायता से वाच्य परिवर्तन करते हुए निम्नलिखित संवाद को पुनः लिखिए ।**
**Re-write the following dialogue changing the voice with the help of words given in the box.**
अरुणः ___ रमे ! किं त्वं प्रातः पञ्चवादने उत्तिष्ठसि ?
रमा — आम् ! मया प्रातः पञ्चवादने (i) ___ ।
अरुणः - किं त्वम् वाटिकां सिञ्चसि ?
रमा — आम् ! (ii) ___ वाटिका सिच्यते ।
अरुणः - किं सुधा विद्यालयं गच्छति ?
रमा — आम् ! सुधया (iii) ___ गम्यते ।

| मञ्जूषा |
|---|
| विद्यालयम्, उत्थीयते, मया । |

**अथवा (OR)**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तन कुरुत ।**
**निम्नलिखित वाक्यों में वाच्य-परिवर्तन कीजिए ।**
**Change the voice in the following sentences.**
**(क)** लता पाठं पठति ।
**(ख)** शिक्षकेन लेखः लिख्यते ।
**(ग)** सेवकः सेवाम् करोति ।

8. **अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत । (केवलं प्रश्नचतुष्टयम्)**
**निम्नलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए । (केवल चार प्रश्न)**
**Re-write the daily routine using words in place of figures. (Only four questions)**
**(क)** अहं प्रातःकाले 5:00 वादने सुप्त्वा उत्तिष्ठामि ।
**(ख)** 5:30 वादने नित्यक्रियां सम्पादयामि ।
**(ग)** 5:45 वादनं यावत् योगाभ्यासं करोमि ।
**(घ)** 6:15 वादने अल्पाहारं स्वीकरोमि ।
**(ङ)** अहं विद्यालयं 7:00 वादने गच्छामि ।

9. **अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयत । (केवलं प्रश्नचतुष्टयम्)**
**निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए अव्यय पदों के द्वारा कीजिए । (केवल चार प्रश्न)**
**Fill in the blanks in the following sentences with appropriate indeclinable words given in the box.**
**(Only four questions)**
**(क)** ईश्वरः ___ व्यापकः अस्ति ।
**(ख)** बालकाः ___ पादकन्दुकेन क्रीडन्ति ।
**(ग)** उद्याने ___ पुष्पाणि सन्ति, तत्र भ्रमराः गुञ्जन्ति ।
**(घ)** मन्दिरस्य ___ स्वर्णकलशः स्थापितोऽस्ति ।
**(ङ)** त्वम् इदानीम् ___ आगच्छसि ?

| मञ्जूषा |
|---|
| उपरि, अत्र, कुतः, सर्वत्र, यत्र |

**10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । अशुद्धं पदं संशोध्य पुनः लिखत । (केवलं प्रश्नचतुष्टयम्)**
**निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है । अशुद्ध पद को संशोधित कर पुनः लिखिए । (केवल चार प्रश्न)**
**Correct the underlined incorrect words in the following sentences. (Only four questions)**

**(क)** बालकौ पाठं पठति ।
**(ख)** त्वम् ग्रामं गच्छति ।
**(ग)** वृक्षात् फला: पतन्ति ।
**(घ)** कवि: ह्य: कवितां पठिष्यति ।
**(ङ)** बालिका कन्दुक: क्रीडिष्यति ।

## खण्ड:-घ (SECTION-D)

## पठित-अवबोधनम् (पठित-अवबोधन)

Reading Comprehension

**11. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**
**निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।**
**Read the following prose passage and answer the given questions in Sanskrit.**

परशुरामकुण्डं तु लोहितनद्या: किञ्चिद् दूरे अस्ति । पूर्वम् इदं ब्रह्मकुण्डम् आसीत् । इदं लोहितनद्या: उदगमस्थलम् इति मन्यते । अत्र अनेकानि दर्शनीयानि स्थलानि अपि सन्ति । अस्माकं पर्यटनविभागेन प्रकाशितां केषाञ्चित प्रसिद्धस्थलानां सूचीं पठित्वा ज्ञायताम् इमानि पर्यटनस्थलानि । एतेषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते । कार्यक्रमस्तु सुनिश्चितः । जलपानाद् अनन्तरं गमिष्यामः ।

**(अ)** एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions)
**(क)** 'ब्रह्मकुण्डम्' कस्या: उद्गमस्थलं मन्यते ?
**(ख)** कस्तावत् सुनिश्चित: वर्तते ?
**(ग)** परशुरामकुण्डं पूर्वं किम् आसीत् ?

**(ब)** पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्णवाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question)
**(क)** केषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते ?
**(ख)** प्रसिद्धस्थलानां सूची केन विभागेन प्रकाशिता ?

**(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)**
**दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)**
**Choose and write the appropriate answer from the given options. (Only four questions)**

**(क) "व्यवस्था" इति कर्तृपदस्य किं क्रियापदं गद्यांशे प्रयुक्तम् ?**
(i) आसीत्
(ii) वर्तते
(iii) मन्यते

**(ख) "एतेषाम्" इति सर्वनामपदं केभ्य: प्रयुक्तम् ?**
(i) पर्यटनस्थलेभ्य:
(ii) उद्गमस्थलेभ्य:
(iii) कुण्डेभ्य:

**(ग) "अनेकानि" इति पदं कस्य पदस्य विशेषणम् ?**
(i) ब्रह्मकुण्डम्
(ii) स्थलानि
(iii) एतेषाम्

**(घ) 'पश्चात्' इत्यर्थे किं समानार्थकं पदं प्रयुक्तम् ?**
(i) सुनिश्चित:
(ii) व्यवस्था

(iii) अनन्तरम्
**(ङ) 'समीपे' इति पदस्य विलोमपदं किं प्रयुक्तम् ?**
(i) दूरे
(ii) अत्र
(iii) पूर्वं

**12. अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**
**निम्नलिखित पद्य को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।**
**Read the following poetry passage and answer the given questions in Sanskrit.**

पापिनाञ्च सदा दु:खं, सुखं वै पुण्यकर्मणाम् ।
एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत् ॥

**(अ)** एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions)
**(क)** पापिनाञ्च सदा किं भवति ?
**(ख)** केषां सुखं भवति ?
**(ग)** जीवने कां समाचरेत् ?

**(ब)** पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्णवाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question)
**(क)** 'पापिनां सदा दु:खं भवति' इति ज्ञात्वा मानव: कीदृशम् आचरणं कुर्यात् ?
**(ख)** जनै: स्थिरतरं किं ज्ञातव्यम् ?

**(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)**
**दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)**
**Choose and write the appropriate answer from the given options. (Only four questions)**
**(क) 'सुखम्' इत्यस्य विलोमपदं किं प्रयुक्तम् ?**
(i) पुण्यम्
(ii) दु:खम्
(iii) धनम्
**(ख) 'कर्मणाम्' इत्यस्य विशेषणं किम् ?**
(i) वै
(ii) एवं
(iii) 'पुण्य' इति
**(ग) 'समाचरेत्' इति क्रियापदस्य कर्तृपदं किम् ?**
(i) मानव:
(ii) शिशु:
(iii) वृद्ध:
**(घ) 'सर्वदा' इति पदस्य पर्यायपदं किम् प्रयुक्तम् ?**
(i) वै
(ii) एवम्
(iii) सदा
**(ङ) 'पुण्यकर्मणाम्' इत्यस्य विलोमपदं किम् ?**
(i) स्थिरतरम्
(ii) पापिनाम्
(iii) दु:खम्

**13. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**
**निम्नलिखित नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए.**
**Read the following drama passage and answer the given questions in Sanskrit.**

काक:- रे परभृत ! यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्यु: पिका: ? अत: अहमेव करुणापर: पक्षिसम्राट् काक: ।

राजहंस: - शान्तं पापम् । अहमेव नीरक्षीरविवेकी पक्षिणां राजा ।
बक: - धिक् युष्मान् । अहमेव सर्वशिरोमणि: । (तत: प्रविशति प्रकृतिमाता)
प्रकृति: - (सस्नेहम्) अलम् अलं मिथ: कलहेन । अहं प्रकृति: एव युष्माकं जननी । यूयं सर्वे एव मम प्रिया: । सर्वेषामेव महत्त्वं विद्यते यथासमयम् । सर्वै: एव मे शोभा । न तावत् कलहेन समयं वृथा यापयेत । मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम् ।

**(अ)** एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions)
**(क)** पिकस्य संततिं क: पालयति ?
**(ख)** क: आत्मानं 'नीरक्षीरविवेकी' इति कथयति ?
**(ग)** आत्मानं 'करुणापर: पक्षिसम्राट्' इति क: कथयति ?
**(ब)** पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्णवाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question)
**(क)** सर्वै: एव कस्या: शोभा वर्तते ?
**(ख)** समयं वृथा कथं न पापयेत् ?
**(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)**
**दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)**
**Choose and write the appropriate answer from the given options. (Only four questions)**
**(क) 'करुणापर:' इति कस्य विशेषणम् ?**
(i) बकस्य
(ii) काकस्य
(iii) राजहंसस्य
**(ख) 'अहमेव सर्वशिरोमणि: ।' अत्र 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?**
(i) राजहंसाय
(ii) बकाय
(iii) काकाय
**(ग) 'परस्परम्' इति पदस्य समानार्थकं किं पदं नाट्यांशे प्रयुक्तम् ?**
(i) सर्वे
(ii) युष्माकम्
(iii) मिथ:
**(घ) 'सर्वै: एव मे शोभा' अत्र 'मे' सर्वनामपदं कस्मै प्रयुक्तम् ?**
(i) बकाय
(ii) राजहंसाय
(iii) प्रकृत्यै
**(ङ) 'पालयामि' क्रियापदस्य कर्तृपदं किम् ?**
(i) काक:
(ii) राजहंस:
(iii) अहम्

**14. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं प्रश्नचतुष्टयम्)**
**रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए । (केवल चार प्रश्न)**
**Frame the questions on the basis of underlined words. (Only four questions)**
**(i)** कोकिल: मधुमासे आम्रवृक्षे स्थित्वा गायति ।
**(ii)** प्रकृति: सर्वान् जीवान् स्नेहेन परिपालयति ।
**(iii)** भगवद्गीता महाभारतस्य अंश: अस्ति ।
**(iv)** चञ्चलं मन: अभ्यासेन वशं भवति ।
**(v)** त्यागसमं सुखम् नास्ति ।

**15. मञ्जूषात: समुचितपदानि चित्वा अधोलिखितश्लोकयो: अन्वयं पूरयत ।**

**मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोको के अन्वय को पूर्ण कीजिए ।**
**Complete the prose order of the following two shlokas by choosing the appropriate words given in the box.**

**(क)** अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥
अन्वयः -
यथा चित्ते (i) ___ तथा यदि वाचि (ii) ___ । (iii) ___ तथ्यतः तदेव (iv) ___ इति आहुः ।

**(ख)** परमापद्गतेनापि नैव तात त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥
अन्वयः -
तात ! परम-आपद्गतेन अपि (i) ___ रणे इदम् (ii) ___ विशेषतः (iii) ___ न एव (iv) ___ ।

| ***मञ्जूषा*** |
|---|
| समत्वम्, महात्मानः, भवेत्, अवक्रता, प्रयोक्तव्यम्, अस्त्रम्, मानुषेषु, त्वया । |

**16. अधोलिखितानां कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)**
**निम्नलिखित कथनों का समुचित भाव विकल्पों में से चुनकर लिखिए । (केवल चार प्रश्न)**
**Choose and write the correct gist of the following sentences from the given options. (Only four questions)**

**(क) परमहम् अखण्डः '<u>शाश्वतः</u>' विभुः च ।**
(i) शिशुवत्
(ii) नित्यः
(iii) सारस्वतः

**(ख) '<u>परुषां</u>' वाचं न अभ्युदीरयेत् ।**
(i) मधुराम्
(ii) गर्वयुक्ताम्
(iii) कठोराम्

**(ग) सः सत्येन <u>पाणिना</u> चक्रम् गृहीतवान् ।**
(i) हस्तेन
(ii) पादेन
(iii) दण्डेन

**(घ) <u>सम्यक</u> अभिज्ञातम् ।**
(i) समानरूपेण
(ii) वस्तुतः
(iii) सुष्ठुरूपेण

**(ङ) सर्वस्तरतु <u>दुर्गाणि</u> ।**
(i) विघ्नानि
(ii) भवनानि
(iii) मन्दिराणि